MEDHĀMANTHAN ISSN : 3139-7840
A Premier Peer-Reviewed, Open-Access, Bimonthly, International Online Research Journal
Dedicated to the fields of Arts, Humanities and Social Sciences
Adhering to UGC Guidelines and Quality Mandates
Volume: 1, Issue: 2 (JUL - AUG) 2026

# A Study on the Ashraya (Locus) of Avidya in the Thirteenth Chapter of Shrimad Bhagavad Gita Bhashya

## श्रीमद्भगवद्गीताभाष्ये त्रयोदशाध्याये अविद्याश्रयत्वविचारः

***Pathak Rushikesh Abhayrao***

*Research Scholar, Department of Advaita Vedanta*
*National Sanskrit University, Tirupati, Andhra Pradesh, India.*
*Email: rushikeshpathak7129@gmail.com*
*Page No: 115-117*

***Abstract:*** *This research paper critically examines the dialectical inquiry into the locus (āśraya) of ignorance (avidyā) as expounded by Śrī Śaṅkarācārya in his commentary on the second verse of the thirteenth chapter (Kṣetra-kṣetrajña-vibhāga-yoga) of the Śrīmad Bhagavad Gītā. While elucidating the fundamental identity between the individual knower (Kṣetrajña) and the Supreme Consciousness, the Bhāṣyakāra addresses the dialectical challenge concerning whose possession ignorance truly is.*

*Adopting a rigorous dialectical method of objection and resolution (pūrvapakṣa-siddhānta), the study demonstrates that avidyā can neither reside in the self-luminous, unattached Pure Consciousness (Cit / Ātman) nor in the insentient non-Self (anātman). The paper explores the fundamental untenability of questioning the locus of avidyā, showing that attempting to know the relation between the knower and ignorance through an external observer leads to an infinite regress (anavasthā). Ultimately, because the Self is eternally self-evident, immediate (nityāparokṣa), and strictly the subject (jñātā) rather than an object of knowledge (jñeya), any ontological relation between the Self and avidyā is unprovable (aprāmāṇika). The inquiry establishes that avidyā is merely an apparent superimposed appearance devoid of ultimate reality.*

***Keywords:*** *Kṣetrajña, Avidyā, Cit, Anavasthā, Aparokṣa.*

**प्रस्तावना—**

श्रीमद्भगवद्गीता समग्रवेदान्तदर्शनस्य सारभूता, प्रस्थानत्रय्याम् अन्यतमा च वर्तते। अत्र अष्टादशाध्यायेषु विभक्ते भगवद्वचने त्रयोदशाध्यायः ज्ञानस्य दृष्ट्या परममहत्त्वं भजते। यतः अस्मादेव अध्यायात् आरभ्य अन्तिमषट्कस्य (ज्ञानषट्कस्य) आरम्भो भवति, यत्र 'तत्त्वमसि' इत्यादिमहावाक्यार्थनिष्ठं तत्त्वज्ञानं विशुद्धविवेकज्ञानेन प्रतिपाद्यते।

अस्य त्रयोदशाध्यायस्य द्वितीयश्लोकव्याख्यानावसरे अद्वैतवेदान्तप्रतिष्ठापकाः जगद्गुरुश्रीमच्छङ्करभगवत्पूज्यपादाः जीव-ब्रह्मणोः वस्तुतः ऐक्यं साधयन्तः अविद्यासम्बन्धस्य अप्रामाणिकत्वं प्रतिपादयन्ति। यदि आत्मा नित्यशुद्ध-बुद्ध-मुक्तस्वभावः, तर्हि अविद्या नाम अज्ञानं कुत्र तिष्ठति? अस्याः अविद्यायाः वास्तविकः आश्रयः कः?—इति वेदान्तदर्शने परमगम्भीरः विचारः। पूर्वपक्ष-सिद्धान्तरीत्या, प्रश्नोत्तरपद्धत्या च आचार्यशङ्करैः अविद्यायाः चिदनाश्रयत्वं, जडानाश्रयत्वं तथा च आत्माविद्यासम्बन्धस्य ज्ञेयत्वानुपपत्तिं प्रदर्श्य अविद्याश्रयत्वविषये यः प्रौढविचारः कृतः, स एवास्मिन् शोधपत्रे विस्तरेण निरूप्यते।

क्षेत्रज्ञं चापि मां विद्धि सर्वक्षेत्रेषु भारत।

क्षेत्रक्षेत्रज्ञयोर्ज्ञानं यत्तज्ज्ञानं मतं मम॥

त्रयोदशाध्यायोऽयं गीताभाष्यस्य अन्तिमषट्कस्य आदिमः अध्यायः वर्तते। अन्तिमषट्कोऽयं तत्त्वंपदार्थयोः ऐक्यरूपवाक्यार्थनिष्ठः सम्यग्धीप्रधानश्च इत्यभियुक्तिर्वर्तते। सम्यग्धीः तत्वज्ञानं प्रधानं प्रयोजनं यस्य सः इति। अस्मिन्नध्याये भगवता श्रीकृष्णेन प्रथमश्लोके क्षेत्रज्ञस्य क्षेत्रस्य च याथात्म्यं विधाय द्वितीयश्लोके क्षेत्रज्ञस्य स्वस्य च ऐक्यरूपः वाक्यार्थः प्रतिपादितः।

तथाहि क्षेत्रक्षेत्रज्ञयोः ज्ञेयभूतयोः यज्ज्ञानं वर्तते, येन ज्ञानेन क्षेत्रक्षेत्रज्ञौ विषयीक्रियेते, तादृशं सम्यग्ज्ञानं नाम विवेकज्ञानं ममाभिमतमिति भगवता उच्यते। तत्रास्य श्लोकस्य व्याख्यानावसरे भगवत्पूज्यपादैः आत्मनः अविद्यासम्बन्धस्याप्रामानिकत्वबोधनाय अविद्याश्रयविचारः प्रदर्शितः। तदिदानीं निरूप्यते।

ययाविद्यया विरुद्धानुभवोपि निर्वोढुं शक्यते, तस्याः अविद्यायाः स्वातन्त्र्यं न भवति, अतः तस्याः आश्रयस्तु वक्तव्यः।

तस्याः अविद्यायाः आश्रयः चिद्भिन्नः न भवति, चिद्भिन्नस्यान्यस्याभावात्। यदि चित् तस्याः अविद्यायाः आश्रयः इत्युच्यते, तर्हि चिदः ज्ञानरूपत्वात् चित् तस्याः अविद्यायाः आश्रयः इति वक्तुं न शक्यते। अतस्तस्याः अविद्यायाः आश्रयः कः इति जिज्ञासायामुच्यते— सा अविद्या कस्येति। तस्याः अविद्यायाः आश्रयः कः भवतीति।

सा अविद्या किमात्मसम्बन्धिनी भवत्युत अनात्मसम्बन्धिनी भवतीति प्रश्नः। तत्र प्रथमपक्षमादाय इदमुच्यते यत् सा अविद्या आत्मसम्बन्धिनी न भवतीति। कुतः इति चेत्, आत्मनः स्वप्रकाशादसङ्गत्वाच्च अविद्यायाः सम्बन्धी आत्मा न भवतीति। अस्तु तर्हि सा अविद्या अनात्मसम्बन्धिनी भवत्विति द्वितीयपक्षमादाय इदमुच्यते, यत् सा अविद्या अनात्मसम्बन्धिनी इत्यपि वक्तुं न शक्यते। कुतः? तत्रोच्यते—अनात्मा नाम जडपदार्थो भवति, अत एव जडस्याज्ञानसम्बन्धो नामाज्ञानाश्रयत्वं न सम्भवति। न च सा अविद्या स्वतन्त्रेति वक्तुं युक्तम्, यतो हि सा जडत्वेन परतन्त्रा भवति। अतः पारतन्त्र्यत्वात् तस्याः स्वातन्त्र्यं न भवति।

तत्र विकल्प्य पृच्छ्यते, कस्य सा अविद्या इत्यनेन किं त्वया अविद्यायाः आश्रयमात्रं पृच्छ्यते उत आश्रयविशेषं पृच्छ्यते इति। यदि आश्रयमात्रं पृच्छ्यते चेदविद्या यदाश्रयत्वेन दृश्यते सैवाविद्यायाः आश्रयो भवति। अस्यायं भावः, किमविद्या दृश्या उत अदृश्या वा। तत्र अविद्यायाः दृश्यत्वे पारतन्त्र्यात् किञ्चिन्निष्ठत्वेनैव तद्दर्शनात् आश्रयमात्रं प्रष्टव्यम्। एवञ्चाविद्यायाः अदृश्यत्वेऽप्रकाशकत्वात् तस्याः असिद्धिर्भवति। तत्र पूर्वपक्षिणोच्यते मया अविद्यायाः आश्रयविशेषः पृच्छ्यते। तस्मात् कस्य दृश्यते इति प्रश्नः इत्युक्ते अविद्या किमाश्रया भवतीति प्रश्नः। तत्र सिद्धान्तिभिरुच्यते अविद्या कस्य इति प्रश्नैव निरर्थकः स्यात्। कुतः? तदोच्यते अविद्यायाः दृश्यमानत्वात् तदाश्रयविशेषस्यात्मनः स्वानुभवसिद्धत्वादिति। अतः प्रश्नोऽयं निरर्थको भवति। अविद्या यदि दृश्यते चेत् तद्वन्तमपि नाम अविद्यावन्तमपि पश्यत्येव नाम जानात्येव। यथा गोमति पुरुषे गवां तद्वतश्च दर्शने सति पुनः तत्प्रत्ययानन्तरं कस्य गाव इति प्रश्नो न भवति। गोमान् देवदत्तः मया दृष्टः इत्येव प्रतीतिदर्शनात्।

अत्र पुनराशङ्कते, गवां तद्वतश्च दर्शने सति कस्य गावः इति प्रश्नो निरर्थको भवति, परन्तु अविद्या तद्वांश्च न मया गावः इव गोमानिव च प्रत्यक्षेण दृश्यते। अतः मया यः प्रश्नः पृष्टः स न निरर्थको भवतीति। तत्र सिद्धान्तिभिरुच्यते, अविद्यावतोऽप्रत्यक्षत्वेऽपि तेनाविद्यासम्बन्धे सिद्धे प्रष्टुस्तव प्रश्नानर्थक्यं नास्तीति कथं वक्तुं शक्यते? अप्रत्यक्षेणाविद्यावता सहाविद्यासम्बन्धे ज्ञाते सिद्धे सति तव किं समाधानं स्यात्? न किमपि। अविद्यायाः अनर्थहेतुत्वं वर्तते। अतः सा परिहर्तव्या स्यात्। यस्याविद्या भवति स तामविद्यां परिहरिष्यति। परन्तु अहमेवाविद्यावानतः अहमेव तां परिहरिष्यामि। ननु यदि त्वदीयाविद्या त्वया परिहर्तव्या तर्हि त्वमविद्यां तद्वन्तञ्चात्मानं जानास्येव इति कस्याविद्येति प्रश्नो व्यर्थः एव भवतीति। पुनस्स वदति जानामि परन्तु परोक्षेण जानामि न तु प्रत्यक्षेणेति। तर्हि तत्रोच्यते यदि अनुमानेन जानासि चेत् तव कथं स्वस्याविद्यायाश्च वर्तमानसम्बन्धस्य ग्रहणं भवितुमर्हति? यस्मिन् काले अविद्यां जानासि तस्मिन् काले अविद्यासम्बन्धं ग्रहीतुं त्वया न शक्यते।

ननु यः अविद्यां गृह्णाति तस्य ज्ञातुः आत्मनः अन्यः एव ज्ञाता आत्माविद्यासम्बन्धं गृह्णातु को दोषः। ज्ञातुः आत्मनः अविद्यायाश्च यः सम्बन्धः तस्य यो ग्रहीता सः न सम्भवति। तद्विषयम् अविद्यात्मसम्बन्धविषयम् अन्यच्च ज्ञानं न सम्भवति। तथा सति अनवस्थाप्रसङ्गो भवति। यदि ज्ञाता ज्ञेयसम्बन्धं ज्ञास्यति तर्हि तस्य ज्ञानार्थमन्यः ज्ञाता कल्प्यः। पुनः सोऽप्यविद्यावान्भवति। अतस्तस्यापि ज्ञानार्थमन्यः ज्ञाता। एवं सति अनवस्थाप्रसङ्गः स्यात्। अनवस्था अपरिहार्या स्यात् इति समाधानमुच्यते।

ननु एवं ज्ञातुः आत्मनः ज्ञेयत्ववचने भवति अनवस्थादोषः इति ज्ञातुः ज्ञेयत्वं मा भून्नाम परन्तु अविद्यात्मसम्बन्धस्य ज्ञेयत्वे कानुपपत्तिः इति चेदुच्यते, मैवं तथा इति। ज्ञातुः आत्मनः ज्ञेयत्वं विना तन्निष्ठाविद्यासम्बन्धस्य ज्ञेयत्वायोगात्। आत्मा एवं च अविद्या इति उभयपदार्थज्ञानाधीनं भवति आत्माविद्यासम्बन्धज्ञानम्। अत एव ज्ञातुः आत्मनः कर्मकर्तृत्वविरोधादपि न अविद्यात्मसम्बन्धस्य ज्ञेयत्वमिति। तदुपरि पुनः शङ्कते। यथा अविद्यावतः आत्मनः अनुमानवेद्यत्वं दुष्टं तथैव प्रत्यक्षवेद्यत्वमपि दुष्टमेव इति कृत्वा अनुमानेन चेज्जानासि कथं सम्बन्धग्रहणमित्याचार्यैः कुतः भाषितमिति चेत् तत्रोच्यते, स्वप्रकाशस्यात्मनः नित्यापरोक्षचैतन्यरूपत्वात् नास्त्यात्मनः प्रत्यक्षत्वे कोऽपि दोषः। नास्ति तत्र कापि विप्रतिपत्तिरिति। तत्र श्रुतिः यत्साक्षादपरोक्षाद् ब्रह्मेति। यदा च एवमात्मा ज्ञातैव न ज्ञेयः, अविद्यादिकं ज्ञेयमेव भवति न ज्ञातृ इति नियमः सिद्ध्यति तदा

किञ्चिदपि न दुष्यतीति। न कोऽपि दोषस्तत्र इत्यर्थः। तस्य कः भावः इत्युक्ते आत्मनि अविद्यासम्बन्धः अप्रामाणिकः भवतीति।

**उपसंहारः**

उपर्युक्तविवेचनेन इदं सुस्पष्टं भवति यत् अद्वैतसिद्धान्ते अविद्या नाम काचित् वस्तुसती, स्वतन्त्रा वा सत्ता न वर्तते। अविद्यायाः आश्रयविषये यः कोऽपि प्रश्नः उत्थाप्यते, स तावद् व्यावहारिकदृष्ट्यैव दृश्यते, न तु पारमार्थिकदृष्ट्या। यतो हि चित्स्वरूपः आत्मा स्वप्रकाशः, असङ्गः, नित्यमुक्तश्च; अतो ज्ञाने अज्ञानस्य सम्बन्धाभावात् न स अविद्यायाः पारमार्थिकः आश्रयः भवितुमर्हति। नापि जडभूतोऽनात्मा अज्ञानाश्रयः सम्भवति।

किञ्च, ज्ञातरि आत्मनि अविद्यासम्बन्धस्य ग्रहणाय यदि अन्यः ज्ञाता कल्प्यते, तर्हि दुर्वारः अनवस्थाप्रसङ्गः आपद्यते। आत्मा तु 'साक्षादपरोक्षाद् ब्रह्म' इति श्रुत्यनुसारेण नित्यापरोक्षः, ज्ञातैव, न तु कदापि ज्ञेयविषयः। अतः ज्ञातरि अविद्यासम्बन्धस्य कल्पनमेव वस्तुतः अप्रामाणिकं युक्तिहीनं च सिद्धम्। एवं पूज्यपादैः शङ्कराचार्यैः अविद्याश्रयत्वविचारस्य खण्डनपूर्वकं विशुद्धचैतन्यरूपस्य आत्मनः निर्लेपत्वं, सर्वक्षेत्रेषु एकस्यैव परमात्मनः सद्भावश्च दृढतया प्रतिष्ठापितः। निष्कर्षतः, अविद्या व्यावहारिकप्रतीतिमात्रमेव, विवेकज्ञानेनोदिते तु केवलम् अखण्डं सच्चिदानन्दतत्त्वमेवावशिष्यते।

**Bibliography**


- Dravid, M. (Ed.). (2015). Śrī Śaṅkarabhagavatpāda's Śrīmad Bhagavadgītā-Bhāṣyam: With commentaries of Śrīmad Anubhūtisvarūpācārya, Śrīmad Ānandagiri and Śrī Bellaṅkoṇḍa-Rāmarāya-kavi (Vol. 1). Śrī Dakṣiṇāmūrti Maṭha Prakāśana.
- Bapatshastri, V. V. (1921). Śrīmadbhagavadgītābhāṣyārtha: Mūḷa śloka, anvayārtha, Śāṅkarabhāṣya, śabdaśaḥ bhāṣyārtha āṇi Gītārahasyaparīkṣaṇātmaka vistṛta ṭīkaā, kośa yāṃsaha. Vishnu Vaman Bapatshastri.
- Dwivedi, P. (Ed.). (n.d.). Vedāntaparibhāṣā of Śrīdharmarājādhvarīndra: With the commentaries 'Śikhāmaṇi' by Śrīrāmakṛṣṇādhvari & 'Maṇiprabhā' by Svāmī Śrī Amaradāsa (Sarasvatībhavana-Granthamālā, Vol. 138; 2nd ed.). Sampurnanand Sanskrit Vishvavidyalaya.
- Dravid, M., & Subrahmanyashastri, S. (Eds.). (2018). Shri Shankarabhagavatpada's Upaniṣadbhāṣyam: With the commentaries of Shri Anandagiriacharya and others, and Taittiriya-vartika of Shri Sureshvaracharya (Vol. 1; 4th ed.). Shri Dakshinamurti Math Prakashan.
- Krishnamurti Sastri, S. R., & Veezhinathan, N. (Eds.). (1973). Śāstra-siddhānta-leśa-saṅgraha of Śrīmad-Appayya-Dīkṣitendra: With the commentary Kṛṣṇālaṅkāra of Acyutakṛṣṇānanda-tīrtha (Śrīmad-Appayya-Dīkṣitendra-Granthāvalī Series, Vol. 2). Śrīmad-Appayya-Dīkṣitendra-Granthāvali Prakāśana-Samiti.